# श्रीवीतरागस्तवनं आदिनाथनमस्कारश्च ॥

– सं. विजयशीलचन्द्रसूरि

पाटणना श्रीहेमचन्द्राचार्य ज्ञानभण्डारमां १ पानांनी, डा. १९१, क्र. ७३९९ नी एक प्रत छे, तेमां आलेखायेली बे लघु रचनाओ अत्रे प्रस्तुत छे. अनुमानतः प्रत १७मा शतकनी होवानुं जणाय छे.

प्रथम रचना 'वीतरागस्तवन' नामे छे. संस्कृत १३ पद्यो प्रमाण आ रचनामां वीतराग जिनदेवनी प्रसाद–मधुर अने भावपूर्ण स्तवना थई छे. कर्ताए पोतानुं नाम स्पष्ट नथी जणाव्युं, पण १३मा पद्यमां आवतां '**चारित्रं सुन्दरं**' ए पदो कर्तानुं नाम सूचवी जतां जणाय छे.

आ रचनाने छेडे एक प्रश्नोत्तरात्मक मजानुं पद्य छे, ते पण ते ज कर्तानुं होय तेवुं मानी शकाय. 'सुभाषित' गणी शकाय तेवुं ए पद्य वांचतां ज आनन्द आपे तेवुं छे.

बीजी रचना छे 'आदिनाथ नमस्कार'. अपभ्रंशनी छांटवाळी गुर्जर भाषामां अने छप्पय छन्दमां रचायेली आ नमस्कारमां शत्रुञ्जय तीर्थपति श्रीआदिनाथनी वन्दना करवापूर्वक कर्ताए पोताना भवभ्रमणनुं बयान आप्युं छे, अने छेवटे तेनाथी थाकेला चंचल मनने निश्चल बनावीने तमारा शरणे रहेवानी–राखवानी याचना करी छे. आमां पांचमा छप्पयमां शत्रुञ्जयना शिखरे चडीने तमारी पूजा करीश, अने रायणना वृक्ष तले तमारां पाय–पगलांनी पण पूजा करीश, ते उल्लेख ध्यान खेंचे तेवो छे. आ रचनाना कर्तानो सीधो उल्लेख अहीं जोवा मळतो नथी. कदाच छेल्ली पंक्तिगत 'आणंदिइं' ए कर्तानुं सूचक पद होई शके.

-----

## श्रीवीतरागस्तवनं

(१)

ॐकारस्फाररूपं परमपदगतं छिन्नमोहप्ररोहं
मायाहङ्कारमुक्तं त्रिगुणविरहितं त्यक्तनिःशेषसङ्गम् ।

ध्यायन्ति ध्यानगम्यं यमिह हृदि सदोद्योतिनं योगिनाथा-
स्तं वन्दे देवदेवं निरुपमपरमज्ञानतेजःस्वरूपम् ॥१॥
न क्रोधो न भयं न मोहमहिमा नाऽहङ्कृतिर्नो मृति-
र्न द्वेषो न जरा न चाऽरति-रती निद्रा न यस्य क्षुधा ।
लोकालोकविभासकं निरुपमं यज्ज्ञानमव्याहतं
नीरागाय निरञ्जनाय निरहङ्काराय तस्मै नमः ॥२॥
मोहद्रोहपरः स्वकर्मगहनं भस्मीचकाराऽखिलं
शुक्लध्यानहुताशनेन सहसा यो योगिचूडामणिः ।
प्राप्तानन्तचतुष्टयं गतभयं निःसङ्ख्यतेजोमयं
तं वन्दे जिनमप्रमेयमहिमागारं सुरेशार्चितम् ॥३॥
भक्तिं ते जगदीश ! ये जडधियो हित्वा परैः कर्मभिः
कायक्लेशकरैस्तपःप्रभृतिभिः क्लिश्यन्ति मुक्त्याप्तये ।
तेषां क्लेशभरं विमुच्य भगवन्नाऽन्यत् फलं सम्भवे-
न्नूनं स्थूलतुषावगाहनकृतां यद्वज्जनानामिह ॥४॥
गर्वावेशविसंस्थ(स्थु)लाः कति सुराः केचिच्च रोषोद्धुराः
केचित् कामविडम्बिताः कति जगद्व्यापारबद्धादराः ।
रागद्वेषपराङ्मुखः शमरसास्वादैकबद्धस्पृहो
नीरागो निरहङ्कृतिस्त्वमिव नो देवः परः श्रीजिन ! ॥५॥
वश्या सिद्धिवधूर्ध्रुवं करतले ताः सिद्धयोऽष्टावपि
स्वर्गश्चात्मगृहं सुकेवलरमा तेषां न दूरस्थिता ।
ये त्वां जन्मजरान्तदुःखदलनं संसारवारच्छिदं
कर्मातीतमनन्तमुज्ज्वलतरं ध्यायन्ति योगीश्वराः ॥६॥
ते धन्यास्ते गुणज्ञास्त इह सुनिपुणा ज्ञानतः स्वास्त एव
श्लाघ्यास्ते ते नमस्या जगति गुणवतां ते सदभ्यस्तशास्त्राः ।
योगाभ्यासे निलीना असमशमरसास्वादपीना हृदन्त-
र्ये त्वामव्यक्तरूपं जिनवर ! दिवसाँश्चिन्तयन्तो नयन्ति ॥७॥
वीतातङ्कं विशङ्कं विगतकलिमलं निश्चलं निःकलङ्कं
ध्येयं ध्यातृप्रदत्तोत्तमसुखनिचयं ध्यानगम्यस्वरूपम् ।

ध्यायेदव्यक्तरूपं स्वहृदयकमले यश्चिदानन्दकन्दं
त्वामानन्दाद् वृणीते प्रगुणगुणगणं तं स्वयं मुक्तिलक्ष्मीः ॥८॥
तत्त्वज्ञानमयं महोदयमयं कारुण्यलीलामयं
शान्तं सूक्ष्ममनन्तमक्षरमनाकारं परं त्वां विभो !।
ध्यायेद् यो हृदयाम्बुजे हततमस्तोमं शतार्कप्रभं
तस्याऽऽदेशकरी च निर्वृतिपुरी निःसङ्ख्यसम्पत्करी ॥९॥
रामास्त्रेण जिगाय यो हरिहरब्रह्मादिदेवान् क्षणाद्
ध्यानाग्नौ मदनृत्तमाप मदनः स ख्यातवीर्योऽपि ते ।
ज्ञानाब्धौ त्रिजगद् बिभर्त्ति भगवन् ! सूक्ष्मैकमत्स्योपमां
स त्वं कोऽपि जिनाऽस्यचिन्त्यमहिमा तत्त्वं परं योगिनाम् ॥१०॥
गात्रं पात्रं कृपायाः परमशमरसास्वादहृद्या गिरस्ते
शत्रौ मित्रे समानं हृदयमपगतद्वेषरागं सदैवम् ।
दुर्जेयं मोहमल्लं तदपि किल भवान् द्राग् विजिग्य(ग्ये?) स्वरूपं
तत् ते को वेत्ति सम्यग् जिनवर ! विमलज्ञानिनं वै विहाय ॥११॥
यद्वद् हंसाः स्मरन्ति प्रतिदिनममलं मानसं मानसान्त-
श्चन्द्रं यद्वच्चकोरास्तरपि(णि)मुरुरसाच्चक्रवाका यथैव ।
स्वामिन्नव्यक्तरूपं परमपदगतं पुण्यपापोज्झितं त्वां
तद्वद् ध्यायन्ति नित्यं त्रिभुवनमहितं योगिनो मोक्ष[लब्ध्यै ?] ॥१२॥
याचे न प्राज्यराज्यं न च विषयसुखं न श्रियं नापि भोगान्
न स्वर्गं न त्रिवर्गं न च वररमणीसङ्गमं नोरुकीर्तिम् ।
वृत्तादिप्रोक्तमन्त्रस्मृतिधृतिरुचिरं नित्यवैराग्यरङ्गं
**चारित्रं सुन्दरं** मे जिन ! जननहरं देहि त्व (स)द्भक्तियुक्तम् ॥१३॥

इति श्रीवीतरागस्तवनम् ॥

◆

किं कर्पूरशलाकया यदि दृशः पन्थानमेति प्रियः ?
सन्तश्चेदमृतेन किं ? यदि खलास्तत् कालकूटेन किम् ?।
दातारो यदि कल्पशाखिभिरलं, यद्यर्थिनः कै (किं) तृणैः ?
संसारेऽपि सतीन्द्रजालमरं यद्यस्ति तेनापि किम् ?॥

# श्रीआदिनाथनमस्कार

(२)

भत्तिइं पणमिसु आदिदेव सेत्तुजसिरि मंडण
भवीयण मन आणंदकरण कम्मट्ठविहंडण ।
सुर नर किंनर नमइ तुब्भ मणभत्तिइं पाया
पावपंकफेडणसमत्थ तूं तिहुयणि राया ॥
भवभंजण भागु भमीअ तूं पय सरणह राखि
कर जोडीनइ वीनवूं मुगतिमारगडु दाखि ॥१॥
वस्यु काल अनादि नाथ निगोद मझारि
सतर वार एक सासमाहि तहि मरण पयारिइं ।
नीलि फूलि अनंतकाय कंदिइं हूं भमीउ
वरस कोडिलख ते मझारि मइं काल नीगमीउ ॥
पुढवी पाणी अग्नि पुण वाय वणस्सइ जाइ
बि ति चउरिंदी भवि भमीय लाधु मानवकाय ॥२॥
विनडइं च्यारि कषाय क्रोध माया मद मच्छर
यौवन भरि शृंगाररंगि मइं गम्या संवच्छर ।
लोभ लगइ कूडी बुद्धि मइं कीधी सामी
वंच द्रोह छेल छदम भावि नरयागइ पामी ॥
छेअण भेअण भूख उस(?उर?) सहीआं दुःख अनंत
अजखित्ति शुभकरमवसि श्रावयकुलि संपत्त ॥३॥
राग भावि निरखंत रूप ए नयण निरंतर
परदूषण ए श्रवण सुणइं अट्टडाइ मणंतर ।
जीभ न पामइं त्रिपति किम्हइ आहार करंती
वारिउं न करइं क्षणह एक परदोष वंध(वदं)ती ॥
नासिका परिमलगुणि लबध विषयव्यापित देह
तुझ पय तूठइं देव हवं करिसु करमनु छेह ॥४॥

**सेत्रुजसिहरि** चडीय नाह कहीयं तूं अरचिसु
**राइणि रूंखह** तलइ पाय आणंदिहिं चरचिसु ।
न्हवण विलेपण पूजा करी आरती ऊतारिसु
रोग शोक भावठि भमण हूं दूरि निवारिसु ॥
चंचल मन निश्चल करीय राखिसु जिण तूं नामि
मण **आणंदिइं** मागीइए चरण शरण तुम्ह सामि ॥५॥

इतिश्री आदिनाथ नमस्कार समाप्तः ॥

—x—

## केटलाक शब्दो

अनन्तकाय – अनन्त आत्माओनुं एक शरीर गणाती वनस्पति

नरयागइ – नरक गति

अजखिर्त्ति – आर्य क्षेत्रे

अट्टडाइ – 'अथडाय (?)'

त्रिपति – तृप्ति